MURALIDHAR GIRLS' COLLEGE
LIBRARY

# 2022

## SANSKRIT — HONOURS

**Paper : CC-11**

**(Vedic Literature)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**विशेषोल्लेखं विना सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्।**

**Section – A**

**Unit - I**

**(Marks : 30)**

1. निम्नोद्धृतेषु यथाभिमतं ***मन्त्रद्वयस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(a) अग्ने॒ यं य॒ज्ञम॑ध्व॒रं
वि॒श्वतः॑ परि॒भूरसि॑।
स इद्दे॒वेषु॑ गच्छति॥

(b) स॒भामे॑ति कित॒वः पृ॒च्छमा॑नो
जे॒ष्यामीति॑ त॒न्वा॒३॒॑ शूशु॑जानः।
अ॒क्षासो॑ अस्य॒ वि ति॑रन्ति॒ कामं॑
प्रति॒दीव्ने॒ दध॑त॒ आ कृ॒तानि॑॥

(c) यः प्रा॑ण॒तो नि॑मिष॒तो म॑हि॒-
त्वैक॒ इद्राजा॒ जग॑तो ब॒भूव॑।
य ईशे॑ अ॒स्य द्वि॒पद॒श्चतु॑ष्पदः॒
कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

(d) अ॒हमे॒व स्व॒यमि॒दं व॑दामि॒
जुष्टं॑ दे॒वेभि॑रु॒त मानु॑षेभिः।
यं का॒मये॒ तंत॑मु॒ग्रं कृ॑णोमि॒
तं ब्र॒ह्माणं॒ तमृषिं॒ तं सु॑मे॒धाम्॥

MURALIDHAR GIRLS' COLLEGE
LIBRARY



2\. निम्नोद्धृतेषु यथाभिमतं कस्यचि***देकस्य*** मन्त्रस्य व्याख्या कार्या। 8×1

(a) अग्निर्होता कविक्रतुः
सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरा गमत्॥

(b) यदादीध्ये न दविषाण्येभिः
परायद्भ्योऽव हीये सखिभ्यः।
न्युप्ताश्च बभ्रवो वाचमक्रतँ
एमीदेषां निष्कृतं जारिणीव॥

(c) य आत्मदा बलदा यस्य विश्व
उपासते प्रशिषं यस्य देवाः।
यस्य छायामृतं यस्य मृत्युः
कस्मै देवाय हविषा विधेम॥

***अथवा,***

अधोलिखितेषु सन्दर्भेषु यथाभिलाषम् ***एकतमस्य*** व्याख्या कार्या। 8×1

(a) तत्र 'अग्निमीळे' इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम्।

(b) अभिप्लवषडहस्य मध्यवर्तिषूक्थ्येषु तृतीयसवने मैत्रावरुणस्य 'अग्ने यं यज्ञम्' इत्यादिको वैकल्पिकोऽनुरूपस्तृचः।

(c) गतः सूक्तविनियोगः।

3\. (a) ऋग्वेदसंहितायाः प्रथमसूक्ते कति मन्त्राः सन्ति? तत्र कः ऋषिः, का देवता, किं वा छन्दः? सूक्तेऽस्मिन् स्तुतायाः देवतायाः स्वरूपवैशिष्ट्यं पर्यालोच्यताम्। 1+1+1+1+8

***अथवा,***

(b) देवीसूक्तम् ऋग्वेदस्य कस्मिन् मण्डले आम्नातम्? कोऽत्र ऋषिः, का देवता, किं वा छन्दः? सूक्तस्यास्य दार्शनिकं तात्पर्यं निरूप्यताम्। 1+1+1+1+8

**Unit - III**

**(Marks : 10)**

4\. (a) अधोलिखितयोः मन्त्रयोः वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। 5×2

(i) सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या॥

MURALIDHAR GIRLS' COLLEGE
LIBRARY



(ii) मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया॥

***अथवा,***

(b) अधोलिखितयोः यथाभिमतम् ***एकतरस्य*** मन्त्रस्य सप्रसङ्गं व्याख्या कार्या। 10×1

(i) येन देवा न वियन्ति नो च विद्विषते मिथः।
तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः॥

(ii) ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः।
अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान् वः संमनसस्कृणोमि॥

***अथवा,***

(c) 'सा नो भूमिः पूर्वपेये दधातु'— मन्त्रांशोऽयं कुत्र समाम्नातः? कोऽत्र ऋषिः, का वा देवता? भवदीय-पाठ्यांशमवलम्ब्य सूक्तस्यास्य उपजीव्यं सगुरुत्वं पर्यालोच्यताम्। 1+1+1+5+2

## Section – C

### Unit – I

**(Marks : 10)**

5. (a) अधोलिखितयोः वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(i) यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि।
यावन्तो अप्सु प्राणिनां भूयान् पुत्रे पितुस्ततः॥

(ii) स ह निर्दश आस तं होवाच— निर्दशो न्वभूद्यजस्व माऽनेनेति; स होवाच, यदा वै पशोर्दन्ता जायन्तोऽथ स मेध्यो भवति; दन्ता न्वस्य जायन्तामथ त्वा यजा इति; तथेति॥

***अथवा,***

(b) अधोलिखितयोः यथाभिलाषम् ***एकतरस्य*** सप्रसङ्गं व्याख्या कार्या। 10×1

(i) आत्मा हि जज्ञ आत्मनः स इरावत्यतितारिणी॥

(ii) तमेतमभिषेचनीये पुरुषं पशुमालेभे॥

***अथवा,***

(c) 'मनुरेवैकः परिशिशिषे'— सन्दर्भोऽयं कुत्र समुपलभ्यते? भवदीय-पाठ्यांशमवलम्ब्य प्रासङ्गिकम् आख्यानं समुपवर्ण्यताम्। 2+8

MURALIDHAR GIRLS' COLLEGE
LIBRARY



## Unit – II

**(Marks : 15)**

6. निम्नोद्धृतेषु ***एकतमस्य*** सप्रसङ्गं व्याख्या कार्या। 7×1

(a) मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥

(b) अमृतत्वस्य तु नाशास्ति वित्तेन।

(c) आत्मनस्तु कामाय सर्वं प्रियं भवति।

7. (a) बृहदारण्यकोपनिषद् कस्मिन् वेदे समाम्नाता? अस्याः उपनिषदः मुख्यम् उपजीव्यं सम्यगालोच्यताम्। 2+6

***अथवा,***

(b) बृहदारण्यकोपनिषदः एवं विधे नामकरणे किं कारणम्? बृहदारण्यकोपनिषदमवलम्ब्य जीवात्मनः उत्क्रान्तिः सविशदम् आलोच्यताम्। 2+6

---

MGC Library